# શનૈશ્ચરસ્તવરાજઃ

shanaishcharastavarAjaH

sanskritdocuments.org

November 10, 2018

shanaishcharastavarAjaH

# શનૈશ્ચરસ્તવરાજઃ

## Sanskrit Document Information

Text title : shnaishcharastavarAjaH also aShtottarashatanaama stotra see verse 19

File name : shanaishcharastava.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Author : Traditional

Proofread by : NA, Kirk Wortman kirkwort at hotmail.com

Description-comments : bhaviShyapurANa

Latest update : November 11, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શનૈશ્ચરસ્તવરાજઃ

શ્રી ગણેશાય નમઃ ॥

નારદ ઉવાચ ॥

ધ્યાત્વા ગણપતિં રાજા ધર્મરાજો યુધિષ્ઠિરઃ ।
ધીરઃ શનૈશ્ચરસ્યેમં ચકાર સ્તવમુત્તમમ્ ॥ ૧॥

શિરો મે ભાસ્કરિઃ પાતુ ભાલં છાયાસુતોઽવતુ ।
કોટરાક્ષો દૃશૌ પાતુ શિખિકણ્ઠનિભઃ શ્રુતી ॥ ૨॥

ઘ્રાણં મે ભીષણઃ પાતુ મુખં બલિમુખોઽવતુ ।
સ્કન્ધૌ સંવર્તકઃ પાતુ ભુજૌ મે ભયદોઽવતુ ॥ ૩॥

સૌરિર્મે હૃદયં પાતુ નાભિં શનૈશ્ચરોઽવતુ ।
ગ્રહરાજઃ કટિં પાતુ સર્વતો રવિનન્દનઃ ॥ ૪॥

પાદૌ મન્દગતિઃ પાતુ કૃષ્ણઃ પાત્વખિલં વપુઃ ।
રક્ષામેતાં પઠેન્નિત્યં સૌરેર્નામબલૈર્યુતામ્ ॥ ૫॥

સુખી પુત્રી ચિરાયુશ્ચ સ ભવેન્નાત્ર સંશયઃ ।
સૌરિઃ શનૈશ્ચરઃ કૃષ્ણો નીલોત્પલનિભઃ શનિઃ ॥ ૬॥

શુષ્કોદરો વિશાલાક્ષો દુર્નિરીક્ષ્યો વિભીષણઃ ।
શિખિકણ્ઠનિભો નીલશ્છાયાહૃદયનન્દનઃ ॥ ૭॥

કાલદૃષ્ટિઃ કોટરાક્ષઃ સ્થૂલરોમાવલીમુખઃ ।
દીર્ઘો નિર્માંસગાત્રસ્તુ શુષ્કો ઘોરો ભયાનકઃ ॥ ૮॥

નીલાંશુઃ ક્રોધનો રૌદ્રો દીર્ઘશ્મશ્રુર્જટાધરઃ ।
મન્દો મન્દગતિઃ ખંજો તૃપ્તઃ સંવર્તકો યમઃ ॥ ૯॥ orઅતૃપ્તઃ
ગ્રહરાજઃ કરાલી ચ સૂર્યપુત્રો રવિઃ શશી ।
કુજો બુધો ગુરુઃ કાવ્યો ભાનુજઃ સિંહિકાસુતઃ ॥ ૧૦॥

કેતુર્દેવપતિર્બાહુઃ કૃતાન્તો નૈરૃતસ્તથા ।
શશી મરુત્કુબેરશ્ચ ઈશાનઃ સુર આત્મભૂઃ ॥ ૧૧॥

વિષ્ણુર્હરો ગણપતિઃ કુમારઃ કામ ઈશ્વરઃ ।
કર્તા હર્તા પાલયિતા રાજ્યભુગ્ રાજ્યદાયકઃ ॥ ૧૨॥ orરાજ્યેશો
છાયાસુતઃ શ્યામલાઙ્ગો ધનહર્તા ધનપ્રદઃ ।
ક્રૂરકર્મવિધાતા ચ સર્વકર્માવરોધકઃ ॥ ૧૩॥

તુષ્ટો રુષ્ટઃ કામરૂપઃ કામદો રવિનન્દનઃ ।
ગ્રહપીડાહરઃ શાન્તો નક્ષત્રેશો ગ્રહેશ્વરઃ ॥ ૧૪॥

સ્થિરાસનઃ સ્થિરગતિર્મહાકાયો મહાબલઃ ।
મહાપ્રભો મહાકાલઃ કાલાત્મા કાલકાલકઃ ॥ ૧૫॥

આદિત્યભયદાતા ચ મૃત્યુરાદિત્યનન્દનઃ ।
શતભિરુક્ષદયિતા ત્રયોદશીતિથિપ્રિયઃ ॥ ૧૬॥

તિથ્યાત્મા તિથિગણનો નક્ષત્રગણનાયકઃ ।orતિથ્યાત્મકસ્તિથિગણો
યોગરાશિર્મુહૂર્તાત્મા કર્તા દિનપતિઃ પ્રભુઃ ॥ ૧૭॥

શમીપુષ્પપ્રિયઃ શ્યામસ્ત્રૈલોક્યાભયદાયકઃ ।
નીલવાસાઃ ક્રિયાસિન્ધુર્નીલાઞ્જનચયચ્છવિઃ ॥ ૧૮॥

સર્વરોગહરો દેવઃ સિદ્ધો દેવગણસ્તુતઃ ।
અષ્ટોત્તરશતં નામ્નાં સૌરેશ્છાયાસુતસ્ય યઃ ॥ ૧૯॥

પઠેન્નિત્યં તસ્ય પીડા સમસ્તા નશ્યતિ ધ્રુવમ્ ।
કૃત્વા પૂજાં પઠેન્મર્ત્યો ભક્તિમાન્યઃ સ્તવં સદા ॥ ૨૦॥

વિશેષતઃ શનિદિને પીડા તસ્ય વિનશ્યતિ ।
જન્મલગ્ને સ્થિતિર્વાપિ ગોચરે ક્રૂરરાશિગે ॥ ૨૧॥

દશાસુ ચ ગતે સૌરૌ તદા સ્તવમિમં પઠેત્ ।
પૂજયેદ્યઃ શનિં ભક્ત્યા શમીપુષ્પાક્ષતામ્બરૈઃ ॥ ૨૨॥

વિધાય લોહપ્રતિમાં નરો દુઃખાદ્વિમુચ્યતે ।
બાધા યાઽન્યગ્રહાણાં ચ યઃ પઠેત્તસ્ય નશ્યતિ ॥ ૨૩॥

ભીતો ભયાદ્વિમુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ।
રોગી રોગાદ્વિમુચ્યેત નરઃ સ્તવમિમં પઠેત્ ॥ ૨૪॥

પુત્રવાન્ધનવાન્ શ્રીમાન્ જાયતે નાત્ર સંશયઃ ॥ ૨૫॥

નારદ ઉવાચ ॥

સ્તવં નિશમ્ય પાર્થસ્ય પ્રત્યક્ષોઽભૂત્ શનૈશ્ચરઃ ।
દત્ત્વા રાજ્ઞે વરઃ કામં શનિશ્ચાન્તર્દધે તદા ॥ ૨૬॥

॥ ઇતિ શ્રી ભવિષ્યપુરાણે શનૈશ્ચરસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Proofread by Kirk Wortman kirkwort at hotmail.com

*shanaishcharastavarAjaH*
pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*